# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – अक्टूबर , २०१९

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ६ (NEW)** गुणाः - ७०

विषयः –पौरोहित्यम् **कोड – CC-1.1.2** समयः – 11:30 तः 2:30

दिनाङ्कः – 15/10/2019 सन्दर्भग्रन्थः – शुक्लयजुर्वेदी-रुद्राष्टाध्यायी

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या विधीयताम् ।** १०

(१) येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

(२) चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥

(३) गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ।
बृहत्युष्णिहाककुप्सूचीभिः शम्म्यन्तुत्त्वा ॥

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** १०

(१)शिवसंकल्पसूक्ताधारेण मनसः स्थिरिकरणोपायाः के सन्ति इति विवेचनीयाः ।

(२)पुरुषसूक्तानुसारं विराट्पुरुषस्य स्वरूपं वर्णयत ।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या विधीयताम् ।** १०

(१) प्रेता जयता नरऽइन्द्रोवः शर्म्मयच्छतु । उग्रावः सन्तु बाहवोनाधृष्यायथासथ ॥

(२) सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेण दुश्च्यवनेनधृष्णुना ।
तदिन्द्रेणजयततत्सहध्वं युधोनरऽइषुहस्तेन वृष्णा ॥

(३)　　आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ।

हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥

**प्रश्नः – ४　निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।**　　१०

(१)शुक्लयजुर्वेदीय-रुद्राष्टाध्याप्यां प्रतिपादितं इन्द्रपराक्रमं विवेचयत ।

(२)आधुनिकयुगे सूर्यसूक्तस्य वैशिष्ट्यं किमस्ति इति प्रतिपादयत ।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५　अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या विधीयताम् ।**　　१०

(क)　　शिवेन वचसा त्वा गिरिशाच्छावदामसि ।

यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ।।

(ख) नमोऽस्तुनीलग्रीवाय सहस्राक्षाय मीढुषे ।

अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ।।

(ग) नमस्त आयुधायानातताय धृष्णवे ।

उभाभ्यामुतते नमो बाहुभ्यां तव धन्वने ।।

**प्रश्नः – ६　निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।**　　१०

(१)　　माध्यन्दिनसंहितायाःषोडशाध्याये भगवतः रुद्रः येषु भावेषु स्वरूपेषु च स्तुतः, तेषां विवरणं प्रस्तूयताम् ।

(३)रुद्राभिषेकस्य महत्त्वं वैशिष्ट्यं च विवेचतत ।

**प्रश्नः – ७　अधोलिखितेषु केषाञ्चन दशानाम् अर्थं लिखत ।**　　१०

(१)वातजूतः

(२)शस्तिः

(३)सुषारथिः

(४)अत्यतिष्ठत

(५)अजायत

(६)अकल्पयन्

(७)इध्मः

(८)इषाण

(९)इषुहस्तेन

(१०) शर्द्धः

(११) शर्म

(१२) पृश्निगर्भाः

(१३) ओजः

(१४) इषुम्

(१५) नाकम्

********************

## `Answer Key

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ६ (NEW)** | गुणाः - ७० |
| विषयः –पौरोहित्यम् | **कोड – CC-1.1.2** | समयः – |
| दिनाङ्कः - | सन्दर्भग्रन्थः – शुक्लयजुर्वेदी-रुद्राष्टाध्यायी | |

**प्रश्नः – ७**

(१) वातजूतः - वातेन प्रेरितः

(२) शस्तिः -प्रशंसा

(३) सुषारथिः -शोभनः सारथिः

(४) अत्यतिष्ठत – अतिक्रम्य संस्थितः

(५) अजायत – उत्पन्नः

(६) अकल्पयन् – उत्पादितवन्तः

(७) इध्मः – समित् (यज्ञकाष्ठविशेषः)

(८) इषाण - अभिलाष, इच्छा, कामना

(९) इषुहस्तेन – धृतबाणेन

(१०) शर्द्धः - बलम्

(११) शर्म -कल्याणम्, सुखम्

(१२) पृश्निगर्भाः - द्युलोकस्थाः

(१३) ओजः – बलम्

(१४) इषुम् – बाणम्

(१५) नाकम् - स्वर्गम्